# KulirAshtakam

# કુળીરાષ્ટકમ્

## Document Information

Text title : Kulirashtakam

File name : kuLIrAShTakam.itx

Category : shiva, shrIdhara-venkaTesha, aShTaka

Location : doc_shiva

Author : Shridharavenkatesa of Tiruvisanallur or Ayyaval with respect

Latest update : November 16, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2023

*sanskritdocuments.org*

# કુળીરાષ્ટકમ્

તવાસ્યારાદ્ધારઃ કતિ મુનિવરાઃ કત્યપિ સુરાઃ
    તપસ્યા સન્નાહૈઃ સુચિરમમનોવાક્પથચરૈઃ ।
અમીષાં કેષામપ્યસુલભમમુષ્મૈ પદમદાઃ
    કુળીરાયોદારં શિવ તવ દયા સા બલવતી ॥ ૧॥

અકર્તું કર્તું વા ભુવનમખિલં યે કિલ ભવ-
    ન્ત્યલં તે પાદાન્તે પુરહર વલન્તે તવ સુરાઃ ।
કુટીરં કોટીરે ત્વમહહ કુળીરાય કૃતવાન્
    ભવાન્ વિશ્વસ્યેષ્ટે તવ પુનરધીષ્ટે હિ કરુણા ॥ ૨॥

તવારૂઢો મૌળિં તદનધિગમવ્રીળનમિતાં
    ચતુર્વક્ત્રીં યસ્ત્વચ્ચરણસવિધે પશ્યતિ વિધેઃ ।
કુળીરસ્યાસ્યાયં કુલિશભૃદલક્ષ્યશ્શિવભવ-
    દ્દયા સેયં ત્વામપ્યધરિતવતી કિં ન કુરૂતામ્ ॥ ૩॥

શ્રુતિસ્મૃત્યભ્યાસો નયનિચયભૂયઃ પરિચયઃ
    તથા તત્તત્કર્મવ્યસનમપિ શુષ્કશ્રમકૃતે ।
ત્વયિ સ્વાન્તં લગ્નં ન યદિ યદિ લગ્નં તદિયતા
    જિતા કૈવલ્યશ્રીઃ પુરહર કુળીરોઽત્ર ગમકઃ ॥ ૪॥

તપોભિઃ પ્રાગ્જન્મપ્રકરપરિનમ્રૈઃ પુરરિપો
    તનૌ યસ્યાં કસ્યામપિ સ હિ ભવાર્તિપ્રતિભટઃ ।
ત્વયિ સ્યાદ્ધીબન્ધસ્તનુરચરમા સૈવ ચરમા
    કુળીરો બ્રૂતે તન્મહિમપથવિદ્વદ્ગુરુનયમ્ ॥ ૫॥

ધિયો ધાનં નામ ત્વયિ શિવ ચિદાનન્દ પરમો-
    ન્મિષત્સામ્રાજ્યશ્રીકુરળરભસાકર્ષકુતુકમ્ ।
કુળીરેણ જ્ઞાતં કથમનધિગમ્યં દિવિષદાં
    દયા તે સ્વચ્છન્દા પ્રથયતિ ન કસ્મૈ કિમથવા ॥ ૬॥

તદુચ્ચત્વં નૈચ્યં ત્વિતરદિતિ લોકાઃ શિવ મુધા
    વ્યવસ્થામસ્થાને વિદધતિ ચ નન્દન્તિ ચ મિથઃ।
કુળીરસ્ત્વન્મૌળિસ્થિતિમસુલભામેત્ય સ ભવત્-
    કૃપામુચ્ચત્વં તદ્વિરહમપિ નૈચ્યં પ્રથયતિ ॥ ૭॥

કુળીરેશાખ્યાતિર્ગિરિશકૃપયોચ્ચૈરુપહૃતા
    તવેયં ભક્તાયોન્નતિવિતરણ શ્રીગમનિકા ।
ભવદ્ભક્ત્યુન્મીલત્ફલગરિમટીકાસ્થિતિજુષા
    કુળીરસ્ય ખ્યાત્યા જગતિ સહચર્યા વિહરતે ॥ ૮॥

કુળીરેશસ્તોત્રં ત્વદનુપધિકાનુગ્રહભવં
    પઠેયુર્યે નિત્યં શ‍ૃણુયુરપિ વા યે પુનરિદમ્ ।
પ્રસાદાત્તે તેઽમી વિધુત દુરિતાસ્ત્વય્યભિરતાઃ
    ભવેયુર્નિર્યત્નાધિગતસકલાભીપ્સિતફલાઃ ॥ ૯॥

કર્કટકચન્દ્રયોગઃ કર્કટકેશાન મૂર્ધ્નિ તે દૃષ્ટઃ ।
કારય વૃષ્ટિમમોઘાં વારય વર્ષોપરોધદુર્યોગમ્ ॥ ૧૦॥

ઇતિ શ્રી શ્રીધરવેઙ્કટેશાર્ય વિરચિતં કુળીરાષ્ટકં સમાપ્તમ્ ॥

*KulirAshtakam*

pdf was typeset on April 28, 2023

Please send corrections to *sanskrit@cheerful.com*